लाभे असुन् । १वह्नौ अमरः तस्य तथात्वञ्च ऋ० ३।१।२० उक्तं “जन्मन् जन्मन् निहितो जातवेदाः” “जन्मन् जन्मन् सर्वेषु मनुष्येषु निहितो जातवेदाः” भा०। जातमात्रस्य जठरानलसम्पर्कात्तस्य तथात्वम् । २जातानां वेत्तरि च “आदाव जातवेदः” ऋ० १।४४।१ “हे जातवेदः जातानां वेदितः” भा० निरुक्ते ७।१९। तस्य बहुधा व्युत्पत्तिर्दर्शिता यथा “जातवेदाः कस्माज्जातानि वेद जानाति वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणम् । तस्मात् सर्वानृतून् पशवोऽग्निमभिसर्पन्तीति च” ३जातप्रज्ञे ४जातधने ५सूर्य्ये च “उदु त्यं जातवेदसं देवं वहन्ति केतवः” ऋ० १५०।१। “जातवेदसः जातानां प्राणिनां वेदितारं जातप्रज्ञं जातधनं वा” भा० “पञ्चमः पञ्चतपसां तपनो जातवेदसाम्” “विद्युते बाडवजातवेदसाम्” माघः। जातवेदस इदं स देवताऽस्य वा अण् । जातवेदस तत्सम्बन्धिनि त्रि० । “प्र नूनं जातवेदसमश्वम्” निरु० ७।२० धृता ऋक् । तद्देवताके सामभेदे मन्त्रे तृचे च तत्रैव निरुक्ते “तदेकमेव जातवेदसं गायत्रं तृचं दशतयीषु विद्यते यत्तु किञ्चिदाग्नेयं तज्जातवेदसां स्थाने युज्यते” इत्युपक्रमे “उत्तरे ज्योतिषी जातवेदसी उच्येते” भा० ।

**जातायन** पुंस्त्री जातस्य गोत्रापत्यम् अश्वा० फञ् । जातस्य गोत्रापत्ये स्त्रियास्तु जातायाः अपत्यम् ढक् । जातेय जातायां अपत्ये पुंस्त्री ।

**जाति** स्त्री जन–क्तिन् । १जन्मनि, २अनुगतैकाकारबुद्धिजननसमर्थे, अवयवव्यङ्ग्ये सकृदुपदेशव्यङ्ग्ये च ३धर्मभेदे, व्याकरणोक्ते पौत्राद्यपत्यात्मके ४गोत्रे, ५वेदशाखाभेदे च । न्यायोक्ते साधर्म्यवैधर्म्याभ्यां व्याप्तिनिरपेक्षाभ्यां वादिवाक्येषु ६दूषणदानरूपे वाक्ये, ७षड्जादिषु सप्तसु स्वरेषु, ८अलङ्कारभेदे, ९चूल्याम्, शब्दार्थचि० । आमलक्यां, १०जातिफले, ११मालत्यां, (चामेली) पुष्पप्रधानवृक्षे च मेदि० १२काम्पिल्ले विश्वः ।

तत्र व्याकरणोक्तं जातिलक्षणं यथा “आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह” भा० । अस्यार्थः । आक्रियते व्यज्यतेऽनयेति आकृतिः संस्थानम् । गृह्यते इति ग्रहणं ज्ञानम् । आकृत्या ग्रहणं यस्याः सा आकृतिग्रहणा । जातिराकृतिग्रहणा संस्थानव्यङ्ग्येत्यर्थः । तेन मनुष्यगोमृगहंसादीनां पृथक् पृथक् संस्थानैर्व्यज्यमानत्वात् मनुष्यत्वगोत्वमृगत्वहंसत्वादिर्जातिः । एवं ब्राह्मणक्षत्रियवैश्यशूद्राणां पृथक् संस्थानाभावात् ब्राह्मणत्वादेर्जातित्वं न स्यादिति लक्षणान्तरमाह लिङ्गानाञ्च न सर्वभागिति । या सर्वाणि लिङ्गानि न भजते सा च जातिरित्यर्थः । “स्त्रीपुंसयोरपत्यान्ताद्विचतुःषट्पदोरगाः । जातिभेदाः पुमानाख्या” इत्यमरसिंहेन जातिभेदानां स्त्रीपुंसयोरेवेति नियमेन ब्राह्मणादीनां सर्वलिङ्गभागित्वाभावाज्जातित्वम् । किन्तु अज्ञातहंसस्य जनस्य हंसं दृष्टवतोऽपि तस्य संस्थानेन हंसत्वं व्यञ्जितुं न शक्यते इति हंसत्वस्यापि जातित्वं न स्यादिति पूर्वलक्षणस्य दोषः । एवं देवदत्तादिसंज्ञाशब्दस्यापि सर्वलिङ्गभागित्वाभावाज्जातित्वापत्तिरिति द्वितीयलक्षणस्य दोषः इति दोषद्वयमपाकर्त्तुं द्वयोर्लक्षणयोर्विशेषणमाह सकृदाख्यातनिर्ग्राह्येति । सकृदेकवारमाख्यातेन उपदेशेन निश्चयेन ग्राह्या ग्रहीतुं शक्या इत्यर्थः । तेन ईदृशो हंस इत्युपदेशे हंसं दृष्टवतस्तस्य संस्थानेन हंसत्वं व्यञ्जितुं शक्यत एवेति पूर्वलक्षणस्य न दोषः । एवं देवदत्तादिसंज्ञाशब्दस्यैकस्मिन्नुपदेशेऽपि अन्यस्मिन् ज्ञानाभावात् जातित्वं न स्यादिति परलक्षणस्यापि न दोषः । गार्ग्यः पुरुषः गार्गी स्त्री गार्ग्यं कुलमिति सर्वलिङ्गभागित्वात् संस्थानव्यङ्ग्यत्वाभावाच्च गार्ग्यादीनां जातित्वानुपपत्तौ तृतीयलक्षणमाह । गोत्रञ्चेति । पुत्रपौत्रप्रभृतिकमपत्यं गोत्रमिति पूर्वाचार्य्यपरिभाषितं गोत्रमिह गृह्यते गार्गी वात्सीत्यादि । चतुर्थलक्षणमाह चरणैः सहेति चरणञ्च जातिरित्यर्थः । चरणशब्दो वेदैकदेशवाची कठादिरूपः स च अध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियावाचक एव न तु जातिवाचकः । तेनास्य जातिसंज्ञार्थं चरणैः सहेत्युक्तम् । गार्ग्यादीनां यञश्चेति ङीपि सिद्धेऽपि जातिसंज्ञाफलन्तु स्वरार्थम् तथा गार्गी भार्य्या यस्यासौ गार्गीभार्य्य इत्यादौ “जातेश्चेति” पुंवद्भावनिषेधः । गार्गी चासौ भार्य्या चेति गार्ग्यभार्य्या इत्यादौ “पुंवत् कर्मधारयेति” पुनः पुंवद्भावः” “प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद् गुणैः । असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः” इति महाभाष्ये लक्षणान्तरमुक्तम् ।